अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MAS-403**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – मईमासः – 2019

## एम.ए. संस्कृतम्, (सत्रम् : चतुर्थम)
## चम्पूकाव्यम्, नाटकम्

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. रत्नावल्यां मदनमहोत्सवस्य वर्णनं क्रियताम्।
2. मुद्राराक्षसस्य चतुर्थाङ्कस्य कथासारः प्रदेयः।
3. नलचम्पूकाव्यस्य प्रथमोच्छ्वासस्य कथावस्तु लेखनीयम्।
4. रत्नावलीनाटिकायाः नाट्कलावैशिष्ट्यं वर्णनीयम्।
5. मुद्राराक्षसे राजनीतिकलाया महत्त्वं प्रतिपाद्यताम्।

### खण्डः ख
### (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. त्रिविक्रमभट्टस्य जीवनपरिचयः प्रदेयः।
2. राज्ञः उदयनस्य चरित्रचित्रणं वर्णयत।
3. द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
   आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः।।
   – अस्य सप्रसङ्गपुरस्सरं व्याख्या विधेया।
4. अस्ति समस्तविश्वम्भराभोगभास्वल्ललामलीलायमानः समानः सेव्यतया नाकलोकस्य, ग्राम्यकविकथाबन्ध इव नीरसस्य मनोहरः, भीम इव भारतालङ्कारभूतः, कान्ताकुचमण्डलस्पर्शं इवाग्रणीः सर्वविषयाणाम्।
   – गद्यांशस्यास्य व्याख्या करणीया।
5. चाणक्यस्य चरित्र-चित्रणं कुरुत।
6. वृषल! इह खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम् अनुग्रहो निग्रहश्चेति। अनुग्रहस्तावत् आक्षिप्ताधिकारयोः भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव।
   – सप्रसङ्गपुरस्सरं व्याख्या कार्या।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. दमयन्त्याः मातुर्नाम किम् ?
   (अ) प्रियङ्गुभञ्जिका (ब) प्रियङ्गुपुष्पिता
   (स) प्रियङ्गुमञ्जरी (द) प्रियङ्गुमालिका
2. नलचम्पूकाव्ये कति उच्छ्वासाः विद्यन्ते ?
   (अ) सप्त (ब) अष्टौ
   (स) दश (द) द्वादश
3. राज्ञो नलस्य महामन्त्री क आसीत् ?
   (अ) श्रुतकीर्तिः (ब) श्रुतशीलः
   (स) श्रुतवीर्यः (द) श्रुतपरायणः
4. प्रीतिं परां प्रगुणयन्ति गुणा ममैते - इति कस्योक्तिः ?
   (अ) कञ्चुक्याः (ब) चाणक्यस्य
   (स) राज्ञः (द) क्षपणकस्य
5. मुद्राराक्षसे कति अङ्काः सन्ति ?
   (अ) चत्वारः (ब) सप्त
   (स) अष्टौ (द) दश
6. मुद्राराक्षसे गजाध्यक्षः कः ?
   (अ) पुरुषदत्तः (ब) वीरभद्रः
   (स) चन्द्रगुप्तः (द) भद्रभटः
7. सेनापतेः सिंहबलस्य अनुजः कः ?
   (अ) रोहिताक्षः (ब) विजयवर्मा
   (स) भागुरायणः (द) राजसेनः
8. रत्नावली कस्य देशस्य राजनन्दिनी आसीत् ?
   (अ) मगधस्य (ब) कलिङ्गस्य
   (स) सिंहलस्य (द) मलयस्य
9. का वर्तिका गृहीत्वा नाट्येन रतिव्यपदेशेन सागरिकां लिखति ?
   (अ) सुसङ्गता (ब) चूतलतिका
   (स) निपुणिका (द) काञ्चनमाला
10. रत्नावलीनाटिकायाः द्वितीयाङ्कस्य किं नाम वर्तते ?
   (अ) मदनमहोत्सवः (ब) सङ्केतः
   (स) कदलीगृहः (द) इन्द्रजालिकः

--------------x--------------